संस्कृतम्

वेदविभूषण-चतुर्थवर्षः



महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी
यत्र विश्वं भवत्येकनीडम्

महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठानम्

(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्)

संस्कृतम्

वेदविभूषण-चतुर्थ-वर्षः

डा. देवानन्दशुक्लः

डा. सदानन्दत्रिपाठी

महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम् उज्जयिनी

(मानव-संसाधन-विकास-मन्त्रालय, भारत सरकार)

प्रधानसम्पादकः
प्रो. रूप किशोर शास्त्री (सचिव)

लेखकौ
डा. देवानन्दशुक्लः (परियोजनासमन्वयकः)
डा. सदानन्दत्रिपाठी

© महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्जयिनी

मूल्यम् : 40/-

संस्करणम् : 2015 प्रथम

ISBN – 978-93-83597-25-3

प्रकाशिताः प्रतयः : 2000

प्रकाशकः
महर्षि-सान्दीपनि-राष्ट्रिय-वेदविद्या-प्रतिष्ठानम्
(मानवसंसाधनविकासमन्त्रालयः भारतसर्वकारस्याधीनम्)
वेदविद्या मार्ग, चिन्तामण गणेश, पो.ऑ. जवासिया, उज्जैन (म.प्र.) 456006
दूरभाष : (0734) 2502266, 2502254 तथा फैक्स : (0734) 2502253
ई-मेल - msrvvpujn@gmail.com वेबसाईट - www.msrvvp.nic.in

प्राक्कथनम्

सुविदितमेव भवद्भिः महर्षिसान्दीपनिराष्ट्रियवेदविद्याप्रतिष्ठानमिदं वेदविद्यायाः संरक्षणार्थं प्रचारप्रसारार्थं समुन्नतये नानाविधं कार्यक्रमं क्रियमाणं दिनानुदिनं वर्धतेतराम्। सम्प्रति वेदविभूषणमित्यस्मिन् पाठ्यपुस्तकमिदं सुसम्पन्नमिति गौरवमनुभवति प्रतिष्ठानम्।

प्रतिष्ठानस्य पाठ्यक्रमः मौखिकपरम्पराधारितत्वात् मौखिकी परीक्षा आसीदिति भवन्तः जानन्त्येव । यस्मिन् पाठ्यक्रमे कालान्तरे आधुनिकविषयाः व्यावहारिकज्ञान-दृष्ट्या समाविष्टाः। तेऽपि मौखिकपरीक्षोन्मेषमात्रमेवासन्, यस्माद् वेदविभूषणोत्तीर्ण-छात्राणामुच्चाध्ययनार्थं उच्चसंस्थासु प्रवेशप्रक्रियायां काठिन्यमासीत् एवञ्च पाठ्यपुस्तकाभावे अध्ययनाध्यापने बाधाऽपि जातेति । विषयेऽस्मिन् गभीरतया चिन्तनस्य परिणामः एवेदानीम् पुस्तकाकारेण भवतां समक्षे समुपस्थितः । देशेऽस्मिन् प्रतिष्ठानद्वारा सञ्चालितसंस्थानामपि च विद्यार्थिनामध्यापकानाञ्च सौविध्यर्थम् आधुनिकविषयकानां ग्रन्थस्वरूपे पाठ्यक्रमं सज्जीकृत्य अध्ययनाध्यापनार्थं मार्गः प्रशस्तो भवत्विति प्रतिष्ठानस्य मौलिकोऽयमभिनवप्रयासः । पाठ्यक्रमेऽस्मिन् वैदिकवटूनां कृते सुगमतया अवबोधनार्थमस्य पाठ्यक्रमस्य व्यावहारिकरूपमभिलक्ष्य पुस्तकानिप्रकाशितानि । यस्मात् पाठ्यपुस्तकमिदं भवतां सम्मुखे प्रस्तूय मोमुद्यते मे मनः ।

लेखकवर्याभ्यां देवानन्दशुक्ल-सदानन्दत्रिपाठिभ्यां पुस्तकमिदं स्वस्य सम्पूर्णाध्यापनजीवनस्यानुभवं पुरस्कृत्य छात्राणाङ्कृते सरलभाषया सज्जीकृतमेतदर्थं द्वावपि लेखकौ सुतरां साधुवादार्हौ । पुस्तकमिंद वेदविभूषणस्य छात्राणामुपयोगाय लक्ष्यसाध्यं भविष्यतीति मे विश्वासः ।

प्रो. रूप किशोर शास्त्री
सचिवः

वेदभूषण-चतुर्थ-वर्षीयः

संस्कृत-पाठ्यक्रमः

लघुसिद्धान्तकौमुदी – अव्यय प्रकरणम्

हितोपदेशः मित्रलाभः अर्थ-सहितः

धातुरूपाणि –

तुद्, रुध्, तनु, क्री, चुर,

(लट्, लृट्, लोट्, लङ्, विधिलिङ्लकारेषु)

लघुसिद्धान्तकौमुदी

अथाव्ययानि

स्वरादिनिपातमव्ययम् ॥ पा. १.१.३७ ॥

पदपरिचयः – स्वरादिनिपातम् इति प्रथमैकवचनान्तं पदम् । अव्ययम् इति प्रथमैकवचनान्तं पदम् । द्विपदमिदं सूत्रम् ।

समासः – स्वर् आदिर्येषां ते स्वरादयः, स्वरादयश्च निपाताश्च स्वरादिनिपातम्, बहुव्रीहिगर्भः समाहारद्वन्द्वसमासः ।

वृत्तिः – स्वरादयो निपाताश्चाव्ययसञ्ज्ञाः स्युः। स्वर्। अन्तर्। प्रातर्। पुनर्। सनुतर्। उच्चैस्। नीचैस्। शनैस्। ऋधक्। ऋते। युगपत्। आरात्। पृथक्। ह्यस्। श्वस्। दिवा। रात्रौ। सायम्। चिरम्। मनाक्। ईषत्। जोषम्। तूष्णीम्। बहिस्। अवस्। समया। निकषा। स्वयम्। वृथा। नक्तम्। नञ्। हेतौ। इद्धा। अद्धा। सामि। वत्। ब्राह्मणवत्। क्षत्रियवत् । सना। सनत्। सनात्। उपधा। तिरस्। अन्तरा। अन्तरेण। ज्योक्। कम्। षम्। सहसा। विना। नाना। स्वस्ति। स्वधा। अलम्। वषट्। श्रौषट्। वौषट्। अन्यत्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा।

मिथ्या। मुधा। पुरा। मिथो। मिंथस्। प्रायस्। मुहुस्। प्रवाहुकम्, प्रवाहिका। आर्यहलम्। अभीक्ष्णम्। साकम्। सार्धम्। नमस्। हिरुक्। धिक्। अथ। अम्। आम्। प्रताम्। प्रशान्। प्रतान्। मा। माङ्। **आकृतिगणोऽयम्**॥

च। वा। ह। अह। एव। एवम्। नूनम्। शश्वत्। युगपत्। भूयस्। कूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। यत्र। नह। हन्त। माकिः। माकिम्। नकिः। नकिम्। माङ्। नञ्। यावत्। तावत्। त्वे। द्वै। त्वै। रै। श्रौषट्। वौषट्। स्वाहा। स्वधा। वषट्। तुम्। तथाहि। खलु। किल। अथो। अथ। सुष्ठु। स्म। आदह। **(उपसर्गविभक्तिस्वरप्रतिरूपकाश्च)**/ अवदत्तम्। अहंयुः। अस्तिक्षीरा। अ। आ। इ। ई। उ। ऊ। ए। ऐ। ओ। औ। पशु। शुकम्। यथाकथाच। पाट्। प्याट्। अङ्ग। है। हे। भोः। अये। द्य। विषु। एकपदे। युत्। आतः। **चादिरप्याकृतिगणः**॥

तद्धितश्चाऽसर्वविभक्तिः॥ पा. १.१.३८ ॥

पदपरिचयः - तद्धितः इति प्रथमैकवचनान्तं पदम्। च इति अव्ययपदम् असर्वविभक्तिः इति प्रथमैकवचनान्तं पदम् । त्रिपदमिदं सूत्रम्।

समासः - नोत्पद्यते सर्वा विभक्तिर्यस्मात् सोऽसर्वविभक्ति-स्तद्धितः, बहुव्रीहिः ॥

अनुवृत्तिः - अव्ययम् ।

वृत्तिः - यस्मात् सर्वा विभक्तिर्नोत्पद्यते स तद्धितान्तोऽव्ययं स्यात्। परिगणनं कर्तव्यम्। तसिलादयः प्राक् पाशपः। शस्प्रभृतयः प्राक् समासान्तेभ्यः। अम्। आम्। कृत्वोर्थाः। तसिवती। नानाञौ। एतदन्तमप्यव्ययम्॥

कृन्मेजन्तः।। पा. १.१.३९ ।।

पदपरिचयः - कृत् इति प्रथमैकवचनान्तं पदम् । मेजन्त इति प्रथमैकवचनान्तं पदम् । द्विपदमिदं सूत्रम् ।

समासः - मश्च एच् च मेचौ, मेचावन्तेऽस्य स मेजन्तः, बहुव्रीहिः।

अनुवृत्तिः - अव्ययम् ।

वृत्तिः - कृद्यो मान्त एजन्तश्च तदन्तमव्ययं स्यात्। स्मारं स्मारम्। जीवसे। पिबध्यै॥

क्त्वातोसुन्कसुनः।। पा. १.१.४० ।।

पदपरिचयः - क्त्वातोसुन्कसुनः इति प्रथमाबहुचनान्तं पदम् । एकपदमिदं सूत्रम् ।

समासः - क्त्वा च तोसुंश्च कसुंश्च क्त्वातोसुन्कसुनः, इतरेतरयोगद्वन्द्वः ।

अनुवृत्तिः - अव्ययम् ।

वृत्तिः - एतदन्तमव्ययम्। कृत्वा। उदेतोः। विसृपः॥

अव्ययीभावश्च॥ पा. १.१.४१ ॥

पदपरिचयः – अव्ययीभावः इति प्रथमैकवचनान्तं पदम् । च इति अव्ययपदम् । द्विपदमिदं सूत्रम् ।

अनुवृत्तिः – अव्ययम् ।

वृत्तिः – अधिहरि॥

अव्ययादाप्सुपः॥ पा. २.४.८२ ॥

पदपरिचयः – अव्ययात् इति पञ्चम्येकवचनान्तं पदम् । आप्सुपः इति षष्ठ्येकवचनान्तं पदम् । द्विपदमिदं सूत्रम् ।

समासः – आप् च सुप् च आप्सुप्, तस्य, समाहारो द्वन्द्वः ।

अनुवृत्तिः – लुक् ।

वृत्तिः – अव्ययाद्विहितस्यापः सुपश्च लुक्। तत्र शालायाम्॥

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥
वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः।
आपं चैव हलन्तानां यथा वाचा निशा दिशा॥

वगाहः, अवगाहः। पिधानम्, अपिधानम्॥

इत्यव्ययानि॥

हितोपदेशः मित्रलाभः

अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात्प्रस्तावक्रमेण सः पण्डितोऽब्रवीत् । भो राजपुत्राः ! शृणुत -

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।

व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥ 1 ॥

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयिष्यामि । राजपुत्रैरुक्तम् —आर्य ! कथ्यताम् । विष्णुशर्मोवाच — शृणुत यूयम्। सम्प्रति मित्रलाभः प्रस्तूयते । यस्यायमाद्यः श्लोकः -

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ।

साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥ 2 ॥

राजपुत्रा ऊचुः — कथमेतत् ? सोऽब्रवीत् ।

कथा 1

अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति ।

अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडाऽवलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः, कृतान्तमिव द्वितीयमटन्तं पाशहस्तं व्याधमपश्यत् । तमवलोक्याचिन्तयत्- “अद्य प्रातरेवानिष्टदर्शनं जातम्, न जाने किमनभिमतं दर्शयिष्यति” । इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः ।

यतः -

शोकस्थानसहस्त्राणि भयस्थानशतानि च ।

दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ।। 3 ।।

अन्यच्च । विषयिणामिदमवश्यं कर्तव्यम् -

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम् ।

मरणव्याधिशोकानां किमद्य निपतिष्यति ।। 4 ।।

अथ तेन व्याधेन तण्डुलकणान्विकीर्य जालं विस्तीर्णम् । स च प्रच्छन्नो भूत्वा स्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास । ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह - कुतोऽत्र निर्जने वने तण्डुलकणानां सम्भवः ? तन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम् -

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।

वृद्धव्याघ्रेण सम्प्राप्तः पथिकः स मृतो यथा ।। 5 ।।

कपोताः ऊचुः - कथमेतत्। सोऽब्रवीत् –

कथा 2

अहमेकदा दक्षिणारण्ये चरन्नपश्यम् । एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते - भो भोः पान्थाः ! इदं सुवर्णकङ्कणं गृह्यताम् । ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम्भाग्येनैतत्सम्भवति ।
किंत्वस्मिन्नात्मसन्देहे प्रवृत्तिर्न विधेया ।

यतः - **अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।**

यत्राऽऽस्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ।। 6 ।।

किन्तु सर्वत्रार्थार्जने प्रवृत्तिः सन्देह एव ।
तथा चोक्तम् -

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ 7 ॥

तन्निरूपयामि तावत् । प्रकाशं ब्रूते - कुत्र तव कङ्कणम् । व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत्-कथं मारात्मके त्वयि विश्वासः ?

व्याघ्र उवाच-शृणु रे पान्थ ! प्रागेव यौवनदशायामतिदुर्वृत्त आसम् । अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च । वंशहीनश्चाहम् । ततः केनचिद्धार्मिकेणाहमादिष्टः - दानधर्मादिकं चरतु भवान् । तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो कथं न विश्वासभूमिः?
यतः -

इज्याऽध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ 8 ॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥ 9 ॥

मम चैतावाँल्लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि । तथापि "व्याघ्रो मानुषं खादति" इति लोकप्रवादो दुर्निवारः ।
यतः -

गतानुगतिको लोकः कुट्टनीमुपदेशिनीम् ।
प्रमाणयति नो धर्मे यथा गोघ्नमपि द्विजम् ॥ 10 ॥

मया च धर्मशास्त्राण्यधीतानि । शृणु -

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा ।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ! ।। 11 ।।
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ।। 12 ।।

अपरञ्च -

प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ।। 13 ।।

अन्यच्च -

मातृवत्परदारेषु परद्रव्येषु लोष्ठवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ।। 14 ।।

त्वं चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम् । तथा चोक्तम् -

दरिद्रान्भर कौन्तेय ! मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः? ।। 15 ।।

अन्यच्च -

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ।। 16 ।।

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण । ततो यावदसौ तद्वचः प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः ।

तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्– "अहह ! महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि" । इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः । स पान्थोऽचिन्तयत् –

न धर्मशास्त्रं पठतीति कारणं

न चापि वेदाध्ययनं दुरात्मनः ।

स्वभाव एवात्र तथातिरिच्यते

यथा प्रकृत्या मधुरं गवां पयः ॥ 17 ॥

किञ्च -

अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया ।

दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ 18 ॥

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः । तथा ह्युक्तम्-

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा ।

विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ 19 ॥

अपरञ्च-

सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।

अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते ॥ 20 ॥

अन्यच्च -

स हि गगनविहारी कल्मषध्वंसकारी

दशशतकरधारी ज्योतिषां मध्यचारी ।

विधुरपि विधियोगाद् ग्रस्यते राहुणासौ

लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ? ॥ 21 ॥

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च । अतोऽहं ब्रवीमि — कङ्कणस्य तु लोभेन इत्यादि । अतः सर्वथाऽविचारितं कर्म न कर्तव्यम् । यतः-

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री, नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ॥ 22 ॥

तद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह- आः किमेवमुच्यते ?

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारे तु भोजनेऽप्यप्रवर्तनम् ॥ 23 ॥

यतः -

शङ्काभिः सर्वमाक्रान्तमन्नं पानं च भूतले ।
प्रवृत्तिः कुत्र कर्तव्या ? जीवितव्यं कथं नु वा ? ॥ 24 ॥

तथा चोक्तम्-

ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥ 25 ॥

एतच्छ्रुत्वा तण्डुलकणलोभेन नभोमण्डलादवतीर्य सर्वे कपोतास्तत्रोपविष्टाः।

यतः-

सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः ।
छेत्तारः संशयानां च क्लिश्यन्ते लोभमोहिताः ॥ 26 ॥

अन्यच्च- लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥ 27 ॥

अन्यच्च- असम्भवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।
11 प्रायः समापन्न विपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥ 28 ॥

अनन्तरं सर्वे जालेन बद्धा बभूवुः । ततो यस्य वचनात्तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति ।

यतः-

न गणस्याग्रतो गच्छेत्सिद्धे कार्ये समं फलम् ।
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ।। 29 ।।

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच - नायमस्य दोषः ।

यतः-

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ।। 30 ।।

अन्यच्च-

स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः ।
न तु दुर्विहितातीतवस्तूपालम्भपण्डितः ।। 31 ।।

विपत्काले विस्मय एव कापुरुषलक्षणम् । तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम् ।

यतः-

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ।। 32 ।।
सम्पदि यस्य न हर्षो विपदि विषादो रणे च भीरुत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ।। 33 ।।

अन्यच्च -

षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ।। 34 ।।

इदानीमप्येवं क्रियताम् । सर्वैरेकचित्तीभूय जालमादायोड्डीयताम् । यतः-

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।। 35 ।।
संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ।। 36 ।।

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः । अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत्-

संहतास्तु हरन्त्येते मम जालं विहङ्गमाः ।
यदा तु विवदिष्यन्ते वशमेष्यन्ति मे तदा ।। 37 ।।

ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः।

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः – स्वामिन् ! किमिदानीं कर्तुमुचितम् ? चित्रग्रीव उवाच -

माता मित्रं पिता चेति स्वभावात्त्रितयं हितम् ।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ।। 38 ।।

तदस्माकं मित्रं हिरण्यको नाम मूषकराजो गण्डकीतीरे चित्रवने निवसति । सोऽस्माकं पाशांश्छेत्स्यति । इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निवसति ।

ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः । चित्रग्रीव उवाच- सखे हिरण्यक ! किमस्मान्न सम्भाषसे ? ततो हिरण्यकस्तद्वचनं

प्रत्यभिज्ञाय ससम्भ्रमं बहिर्निःसृत्याब्रवीत् - आः, पुण्यवानस्मि । प्रियसुहृन्मे चित्रग्रीवः समायातः ।

यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः ।

यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥ 39 ॥

अथ पाशबद्धांश्चैतान्दृष्ट्वा सविस्मयः क्षणं स्थित्वोवाच- सखे ! किमेतत् ? चित्रग्रीवोऽवदत्-सखे! अस्माकं प्राक्तनजन्मकर्मणः फलमेतत् ।

यस्माच्च येन च यथा च यदा च यच्च

यावच्च यत्र च शुभाशुभमात्मकर्म ।

तस्माच्च तेन च तथा च तदा च तच्च

तावच्च तत्र च विधातृवशादुपैति ॥ 40 ॥

रोगशोकपरीतापबन्धनव्यसनानि च ।

आत्मापराधवृक्षाणां फलान्येतानि देहिनाम् ॥ 41 ॥

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । तत्र चित्रग्रीव उवाच- मित्र ! मा मैवम् । अस्मदाश्रितानामेषां तावत्पाशांश्छिन्धि, तदा मम पाशं पश्चाच्छेत्स्यसि । हिरण्यकोऽप्याह - अहमल्पशक्तिः । दन्ताश्च मे कोमलाः । तदेतेषां पाशांश्छेत्तुं कथं समर्थः ? तद्यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि । तदनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच –अस्त्वेवम् । तथापि यथाशक्त्यैतेषां बन्धनं खण्डय। हिरण्यकेनोक्तम् - आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां सम्मतम् ।

यतः - **आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।**

आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ 42 ॥

अन्यच्च -

धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।

तान्निघ्नता किं न हतं, रक्षता किं न रक्षितम् ? ॥ 43 ॥

चित्रग्रीव उवाच - सखे ! नीतिस्तावदीदृश्येव । किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः । तेनेदं ब्रवीमि ।

यतः -

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।

सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ 44 ॥

अयमपरश्चासाधारणो हेतुः -

जातिद्रव्यगुणानां च साम्यमेषां मया सह ।

मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति ॥ 45 ॥

अन्यच्च -

विना वर्तनमेवैते न त्यजन्ति ममान्तिकम् ।

तन्मे प्राणव्ययेनापि जीवयैतान्ममाश्रितान् ॥ 46 ॥

किञ्च -

मांसमूत्रपुरीषास्थिनिर्मितेऽस्मिन्कलेवरे ।

विनश्वरे विहायास्थां यशः पालय मित्र ! मे ॥ 47 ॥

अपरञ्च पश्य -

यदि नित्यमनित्येन निर्मलं मलवाहिना ।

यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम् ? ॥ 48 ॥

यतः -

शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् ।

शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥ 49 ॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत् – "साधु मित्र! साधु । अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते ।" एवमुक्त्वा तेन सर्वेषां कपोतानां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान्सादरं सम्पूज्याह - सखे चित्रग्रीव ! सर्वथात्र जालबन्धनविधौ सति दोषमाशङ्क्यात्मन्यवज्ञा न कर्तव्या ।

यतः -

योऽधिकाद्योजनशतात्पश्यतीहामिषं खगः ।

स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ॥ 50 ॥

अपरञ्च -

शशिदिवाकरयोर्ग्रहपीडनं

गजभुजङ्गमयोरपि बन्धनम् ।

मतिमतां च विलोक्य दरिद्रतां

विधिरहो बलवानिति मे मतिः ॥ 51 ॥

अन्यच्च –

व्योमैकान्तविहारिणोऽपि विहगाः सम्प्राप्नुवन्त्यापदं

बध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि ।

दुर्नीतं किमिहास्ति ? किं सुचरितं ? कः स्थानलाभे गुणः ?

कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ 52 ॥

इति प्रबोध्यातिथ्यं कृत्वालिङ्ग्य च चित्रग्रीवस्तेन सम्प्रेषितो यथेष्टदेशान्सपरिवारो ययौ । हिरण्यकोऽपि स्वविवरं प्रविष्टः ।

यानि कानि च मित्राणि कर्तव्यानि शतानि च ।

पश्यं मूषकमित्रेण कपोताः मुक्तबन्धनाः ।। 53 ।।

अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यमिदमाह-अहो हिरण्यक ! श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि, अतो मां मैत्र्येणानुग्रहीतुमर्हसि । एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह- कस्त्वम्? स ब्रूते- लघुपतनकनामा वायसोऽहम् । हिरण्यको विहस्याह-का त्वया सह मैत्री ?

यतः-

यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।

अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ।। 54 ।।

अपरञ्च -

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम् ।

शृगालात्पाशबद्धोऽसौ मृगः काकेन रक्षितः ।। 55 ।।

वायसोऽब्रवीत् - कथमेतत् ? हिरण्यकः कथयति –

कथा 3

अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महतां स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन्हृष्टपुष्टाङ्गः केनचिच्छृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत्- आः !

कथमेतन्मांसं सुललितं भक्षयामि ? भवतु, विश्वासं तावदुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् - मित्र ! कुशलं ते ? मृगेणोक्तम्-कस्त्वम् ? स ब्रूते - क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि । अधुना तवानुचरेण मया सर्वथा भवितव्यम् । मृगेणोक्तम् - एवमस्तु ।

ततः पश्चादस्तङ्गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ। तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत्-सखे चित्राङ्ग ! कोऽयं द्वितीयः ? मृगो ब्रूते — जम्बूकोऽयम् । अस्मत्सख्यमिच्छन्नागतः। काको ब्रूते-मित्र ! अकस्मादागन्तुना सह मैत्री न युक्ता । तन्न भद्रमाचरितम् ।

तथा चोक्तम् -

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ।। 56 ।।

तावाहतुः - कथमेतत् ? काकः कथयति -

कथा 4

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद्गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाऽऽहारात् किञ्चित् किञ्चिदुद्धृत्य तस्मै ददति । तेनाऽसौ जीवति, तेषां शावकरक्षां च करोति । अथ तत्रागतः कदाचिद्दीर्घकर्णनामा मार्जारः पक्षिशावकान् भक्षयितुम् ।

ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्त्तैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तम्-कोऽयमायाति ? दीर्घकर्णो गृध्रमवलोक्य सभयमाह-हा ! हतोऽस्मि । यतोऽयं मां व्यापादयिष्यति ।

यतः-

तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
अगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम् ।। 57 ।।

अधुनाऽतिसन्निधाने पलायितुमक्षमः । तद्यथा भवितव्यं तथा भवतु । तावद्विश्वासमुत्पाद्याऽस्य समीपं गच्छामि । इत्यालोच्योपसृत्याब्रवीत्-आर्य ! त्वामभिवन्दे । गृध्रोऽवदत् -कस्त्वम् ? सोऽवदत्- मार्जारोऽहम् । गृध्रो ब्रूते- दूरमपसर । नो चेद् हन्तव्योऽसि मया ! मार्जारोऽवदत्- श्रूयतां तावदस्मद्वचनम् । ततो यद्यहं वध्यस्तदा हन्तव्यः।

यतः-

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ?
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ।। 58 ।।

गृध्रो ब्रूते-ब्रूहि, किमर्थमागतोऽसि ? सोऽवदत् –अहमत्र गङ्गातीरे नित्यस्नायी निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि । यूयं धर्मज्ञानरता विश्वासभूमयः,इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति। अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः।

गृहस्थधर्मश्चैषः-

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः ।। 59 ।।

किञ्च - यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्य एव ।
यतः-

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ।। 60 ।।

अन्यच्च -

बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्वस्याऽभ्यागतो गुरुः।।61।।

अपरञ्च-

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ।। 62 ।।

अन्यच्च -

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्वा पुण्यमादाय गच्छति ।। 63 ।।

अन्यच्च-

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ।। 64 ।।

गृध्रोऽवदत्-मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहमेवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च- मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम् । यतः परस्परं विवदमानानामपि धर्मशास्त्राणाम् “अहिंसा परमो धर्मः” इत्यत्रैकमत्यम् ।

यतः-

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।

सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ।। 65 ।।

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।

शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ।। 66 ।।

योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम् ।

एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ।। 67 ।।

मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते ।

शक्यते नानुमानेन परेण परिरक्षितुम् ।। 68 ।।

शृणु पुनः -

स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते ।

अस्य दग्धोदरस्यार्थे कः कुर्यात्पातकं महत् ?।। 69 ।।

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः।ततो दिनेषु गच्छत्सु पक्षीशावकानाक्रम्य स्वकोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा ।तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः पलायितः।पश्चात्पक्षिभिरितस्ततो निरुपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं ते ऊचुः- अनेनैव जरद्गवेनास्माकं शावकाः खादिताःइति सर्वैः पक्षिभिर्निश्चित्यस गृध्रो व्यापादितः। अतोऽहं ब्रवीमि—अज्ञातकुलशीलस्य-इत्यादि। इत्याकर्ण्य स जम्बुकः सकोपमाह —मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एव आसीत् । तत्कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते ?

अन्यच्च -

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।

निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ 70 ॥

अन्यच्च -

अयं निजः परो वेति गणना लघुचेतसाम् ।

उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ 71 ॥

यथायं मृगो ममबन्धुस्तथा भवानपि। मृगोऽब्रवीत् — किमनेनोत्तरोत्तरेण? सर्वैरेकत्र विश्रम्भाऽऽलापैः सुखमनुभवद्भिः स्थीयताम् ।

यतः -

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः।

व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ 72 ॥

काकेनोक्तम्—एवमस्तु। अ थ प्रातः सर्वे यथाभिमतदेशं गताः । एकदा निभृतं शृगालो ब्रूते-सखे मृग ! अस्मिन्वनैकदेशे सस्यपूर्णक्षेत्रमस्ति। तदहं त्वां तत्र नीत्वा दर्शयामि।तथा कृते सति मृगः प्रत्यहं तत्र गत्वा सस्यं खादति। अथ क्षेत्रपतिना तद्दृष्ट्वा पाशो नियोजितः। अनन्तरं पुनरागतो मृगः तत्र चरन् पाशैर्बद्धोऽचिन्तयत्-को मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः? अत्रान्तरे जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्-फलिता तावदस्माकं कपटप्रबन्धेन मनोरथसिद्धिः। एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनिमयावश्यं प्राप्तव्यानि । तानि च बाहुल्येन भोजनानि भविष्यन्ति ।मृगस्तं दृष्ट्वोल्लासितो ब्रूते-सखे ! छिन्धि तावन्मम बन्धनम्, सत्वरं त्रायस्व माम्।

यतः-

आपत्सु मित्रं जानीयाद्युद्धे शूरमृणे शुचिम् ।
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥ 73 ॥

अपरञ्च -

उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ 74 ॥

जम्बुको मुहुर्मुहुः पाशं विलोक्याचिन्तयत्-दृढस्तावदयं बन्धः।ब्रूते च-सखे ! स्नायुनिर्मिता एते पाशाः । तदद्य भट्टारकवारे कथमेतान्दन्तैः स्पृशामि ? मित्र ! यदि चित्ते नान्यथा मन्यसे तदा प्रभाते यत्त्वया वक्तव्यं तत्कर्तव्यम् ।इत्युक्त्वा तत्समीपम् आत्मानमाच्छाद्य स्थितः सः । अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्येतस्ततोऽन्विष्यन् तथाविधं दृष्ट्वोवाच -सखे ! किमेतत् ? मृगेणोक्तम् - अवधीरितसुहृद्वाक्यस्य फलमेतत् ।

तथा चोक्तम् -

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत्सन्निहिता तस्य स नरः शत्रुनन्दनः ॥ 75 ॥

काको ब्रूते-स वञ्चकः क्वाऽऽस्ते ? मृगेणोक्तम्-मन्मांसार्थी तिष्ठत्यत्रैव ।काको ब्रूते– मित्र ! उक्तमेव मया पूर्वम् -

अपराधो न मेऽस्तीति नैतद्विश्वासकारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ 76 ॥
दीपनिर्वाणगन्धं च सुहृद्वाक्यमरुन्धतीम् ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गताऽऽयुषः ॥ 77 ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥ 78 ॥

ततः काको दीर्घं निःश्वस्य उवाच, अरे वञ्चक ! किं त्वया पापकर्मणा कृतम् ?

यतः-

सँल्लापितानां मधुरैर्वचोभि-
र्मिथ्योपचारैश्च वशीकृतानाम् ।
आशावतां श्रद्दधतां च लोके
किमर्थिनां वञ्चयितव्यमस्ति ॥ 79 ॥

अन्यच्च -

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम् ।
तं जनमसत्यसन्धं भगवति वसुधे ! कथं वहसि ? ॥ 80 ॥
दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥ 81 ॥

अथवा स्थितिरियं दुर्जनानाम् -

प्राक् पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ 82 ॥

तथा च -

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥ 83 ॥

अथ प्रभाते स क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन् काकेनाऽवलोकितः। तमलोक्य काकेनोक्तम्-सखे मृग ! त्वमात्मानं

मृतवत्सन्दर्श्य वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । अहं तव चक्षुषी चञ्च्वा किमपि विलिखामि, यदा अहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे ।मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । अथाऽसौ "आः, स्वयं मृतोऽसि" इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान्ग्रहीतुं सयत्नो बभूव । ततः कियद्दूरे अन्तरिते क्षेत्रपतौ स मृगः काकशब्दं श्रुत्वा सत्वरमुत्थाय पलायितः। तमुद्दिश्य तेन क्षेत्रपतिना प्रकोपात् क्षिप्तेन लगुडेन शृगालो हतः ।

तथा चोक्तम् -

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥ 84 ॥

अतोऽहं ब्रवीमि-भक्ष्यभक्षकयोः प्रीतिः इत्यादि ॥

काकः पुनराह-

भक्षितेनाऽपि भवता नाऽऽहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ! ॥ 85 ॥

अन्यच्च -

तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणाम् ।
सतां हि साधुशीलत्वात्स्वभावो न निवर्तते ॥ 86 ॥

किञ्च -

साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् ।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ 87 ॥

हिरण्यको ब्रूते–चपलस्त्वम्,चपलेन सह स्नेहः सर्वथा न कर्तव्यः ।

तथा चोक्तम् -

मार्जारो महिषो मेषः काकः कापुरुषस्तथा ।

विश्वासात्प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥ 88 ॥

किञ्चान्यत् – "शत्रुपक्षो भवानस्माकम् । शत्रुणा सन्धिर्न विधेयः"।

उक्तञ्चैतत् -

शत्रुणा न हि सन्दध्यात् सुश्लिष्टेनाऽपि सन्धिना ।

सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ 89 ॥

दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।

मणिना भूषितः सर्पः किमसौ न भयङ्करः ? ॥ 90 ॥

यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।

नोदके शकटं याति न च नौर्गच्छति स्थले ॥ 91 ॥

अपरञ्च -

महताऽप्यर्थसारेण यो विश्वसिति शत्रुषु ।

भार्यासु च विरक्तासु तदन्तं तस्य जीवनम् ॥ 92 ॥

लघुपतनको ब्रूते-श्रुतं मया सर्वम् । तथापि मम चैतावान् सङ्कल्पः यत् त्वया सह सौहृद्यमवश्यं करणीयम् इति । नो चेदनाहारेणाऽऽत्मानं तव द्वारि व्यापादयिष्यामि ।

तथाहि -

मृद्घटवत् सुखभेद्यो दुःसन्धानश्च दुर्जनो भवति ।

सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु सन्धेयः ॥ 93 ॥

किञ्च -

द्रवत्वात्सर्वलोकानां निमित्तान्मृगपक्षिणाम् ।

भयाल्लोभाच्च मूर्खाणां सङ्गतं दर्शनात्सताम् ॥ 94 ॥

किञ्च -

नारिकेलसमाकारा दृश्यन्ते हि सुहृज्जनाः ।

अन्ये बदरिकाऽऽकारा बहिरेव मनोहराः ॥ 95 ॥

अन्यच्च -

स्नेहच्छेदेऽपि साधूनां गुणा नाऽऽयान्ति विक्रियाम् ।

भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः ॥ 96 ॥

अन्यच्च -

शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।

दाक्षिण्यञ्चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ 97 ॥

एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत्प्राप्तव्यः ? इत्यादि; तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह - आप्यायितोऽहं भवतामनेन वचनामृतेन ।

तथा चोक्तम् -

घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली

न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।

प्रीत्या सज्जनभाषितं प्रभवति प्रायो यथा चेतसः

सद्युक्त्या च परिष्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम् ॥ 98 ॥

अन्यच्च -

रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता ।

क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥ 99 ॥

अनेन वचनक्रमेण तदेकमपि दूषणमपि त्वयि न लक्ष्यते ।

यतः -

पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणाऽवगम्यते ॥ 100 ॥

अपरञ्च -

अन्यथैव हि सौहार्दं भवेत्स्वच्छान्तरात्मनः ।
प्रवर्ततेऽन्यथा वाणी शाठ्योपहतचेतसः ॥ 101 ॥
मनस्यन्यद्वचस्यन्यत् कर्मण्यन्दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥ 102 ॥

तद्भवतु भवतोऽभिमतमेव । इत्युक्त्वा हिरण्यको मैत्र्यं विधाय भोजनविशेषैर्वायसं सन्तोष्य विवरं प्रविष्टः। वायसोऽपि स्वस्थानं गतः । ततः प्रभृति तयोरन्योऽन्याहारप्रदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कालोऽतिवर्तते । एकदा लघुपतनको हिरण्यकमाह-सखे ! वायसस्य कष्टतरलभ्याहारमिदं स्थानम् । तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि। हिरण्यको ब्रूते-मित्र ! क्व गन्तव्यम् ?

तथा चोक्तम् -

चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नाऽसमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ 103 ॥

वायसो ब्रूते- मित्र ! अस्ति सुनिरूपितस्थानम् । हिरण्यकोऽवदत्-किं तत् ? वायसो ब्रूते-अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः। तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कच्छपो धार्मिकः प्रतिवसति । पश्य मित्र !

यतः -

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।

धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ 104 ॥

स च भोजनविशेषैर्मां संवर्धयिष्यति । हिरण्यकोऽप्याह- तत्किमत्रावस्थाय मया कर्तव्यम् ?

यतः-

यस्मिन्देशे न सम्मानो न वृत्तिर्न च बान्धवः ।

न च विद्यागमः कश्चित्तं देशं परिवर्जयेत् ॥ 105 ॥

अपरञ्च -

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।

पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ 106 ॥

अपरञ्च -

लोकयात्राभयं लज्जा दाक्षिण्यं त्यागशीलता ।

पञ्च यत्र न विद्यन्ते न कुर्यात्तत्र संस्थितिम् ॥ 107 ॥

तत्र मित्र ! न वस्तव्यं यत्र नास्ति चतुष्टयम् ।

ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ 108 ॥

अतो मामपि तत्र नय । वायसोऽवदत् – एवमस्तु । अथ वायसस्तत्र तेन मित्रेण सह विचित्रालापैः सुखेन तस्य सरसः समीपं ययौ । ततो मन्थरो दूरादवलोक्य लघुपतनकस्य यथोचितमातिथ्यं विधाय मूषकस्यातिथिसत्कारं चकार।

यतः -

बालो वा यदि वा वृद्धो युवा वा गृहमागतः।

तस्य पूजा विधातव्या सर्वत्राऽभ्यागतो गुरुः ॥ 109 ॥

तथा -

गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वत्राऽभ्यागतो गुरुः ॥ 110 ॥

अपरञ्च -

उत्तमस्याऽपि वर्णस्य नीचोऽपि गृहमागतः।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ 111 ॥

वायसोऽवदत्- सखे मन्थर ! सविशेषपूजामस्मै विधेहि । यतोऽयं पुण्यकर्मणां धुरीणः, कारुण्यरत्नाकरो हिरण्यकनामा मूषिकराजः । एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेनाऽपि यदि सर्पराजो न कदाचित्कथयितुं समर्थः स्यात्। इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् । ततो मन्थरः सादरं हिरण्यकं सम्पूज्याऽऽह– भद्र ! आत्मनो निर्जनवनागमनकारणमाख्यातुमर्हसि । हिरण्यकोऽवदत्- कथयामि । श्रूयताम् –

कथा 5

अस्ति चम्पकाऽऽभिधानायां नगर्यां परिव्राजकाऽऽवसथः । तत्र चूडाकर्णो नाम परिव्राट् प्रतिवसति । स च भोजनाऽवशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहं च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रियसुहृद्वीणाकर्णो नाम परिव्राजकः समायातः। तेन सह नानाकथाप्रसङ्गाऽवस्थितो मम त्रासार्थं जर्जरवंशखण्डेन चूडाकर्णो भूमिमताडयत् । तं तथाविधं दृष्ट्वा वीणाकर्ण उवाच-

सखे ! किमिति मम कथाविरक्तोऽन्यासक्तो भवान् ? चूडाकर्णेनोक्तम्-मित्र ! नाहं विरक्तः । किन्तु पश्यायं मूषिको ममाऽपकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति । वीणाकर्णो नागदन्तकं विलोक्याह- कथं मूषिकः स्वल्पबलोऽप्येतावद्दूरमुत्पतति । तदत्र केनाऽपि कारणेन भवितव्यम् ।

तथा चोक्तम् –

अकस्माद्युवती वृद्धं केशेष्वाकृष्य चुम्बति ।

पतिं निर्दयमालिङ्ग्य हेतुरत्र भविष्यति ।। 112।।

कथा 6

अस्ति गौडविषये कौशाम्बी नाम नगरी। तस्यां चन्दनदासनामा वणिग्महाधनो निवसति। तेन पश्चिमे वयसि वर्तमानेन कामाधिष्ठितचेतसा धनदर्पाल्लीलावती नाम वणिक्पुत्री परिणीता । सा च मकरकेतो- र्विजयवैजयन्तीव यौवनवती बभूव। स च वृद्धपतिस्तस्याः सन्तोषाय नाभवत्।

यतः-

शशिनीव हिमार्तानां घर्मार्तानां रवाविव ।

मनो न रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ ।। 110 ।।

अन्यच्च -

पतितेष्वपि दृष्टेषु पुंसः का नाम कामिता ।

भैषज्यमिव मन्यन्ते यदन्यमनसः स्त्रियः।। 111 ।।

स च वृद्धपतिस्तस्यामतीवानुरागवान् ।

यतः -

धनाशा जीविताशा च गुर्वी प्राणभृतां सदा ।
वृद्धस्य तरुणी भार्या प्राणेभ्योऽपि गरीयसी ।। 112 ।।
नोपभोक्तुं न च त्यक्तुं शक्नोति विषयाञ्जरी ।
अस्थिनिर्दशनः श्वेव जिह्वया लेढि केवलम् ।। 113 ।।

अथ सा लीलावती यौवनदर्पादतिक्रान्तकुलमर्यादा केनापि वणिक्पुत्रेण सहानुरागवती बभूव ।

यतः -

स्वातन्त्र्यं पितृमन्दिरे निवसतिर्यात्रोत्सवे सङ्गति-
र्गोष्ठी पूरुषसन्निधावनियमो वासो विदेशे तथा ।
संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः
पत्युर्वार्धकमीर्षितं प्रवसनं नाशस्य हेतुः स्त्रियाः ।। 114 ।।

अपरञ्च -

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ।। 115 ।।
स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः ।
सुरूपं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।। 116 ।।
तेन नारद नारीणां सतीत्वमुपजायते ।। 117 ।।
स्त्रियो हि चपला नित्यं देवानामपि विश्रुतम् ।
ताश्चापि रक्षिता येषां ते नराः सुखभागिनः ।। 118 ।।
न स्त्रीणामप्रियः कश्चित्प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवम् ।। 119 ।।

अपरञ्च -

घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद् घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ।। 120 ।।

न लज्जा न विनीतत्वं न दाक्षिण्यं न भीरुता ।
प्रार्थनाभाव एवैकः सतीत्वे कारणं स्त्रियाः ।। 121 ।।

पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रश्च स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति ।। 122 ।।

एकदा सा लीलावती रत्नावलीकिरणकर्बुरे पर्यङ्के तेन वणिक्पुत्रेण सह विश्रम्भालापैः सुखासीना तमलक्षितोपस्थितं पतिमवलोक्य सहसोत्थाय केशेष्वाकृष्य गाढमालिङ्ग्य चुम्बितवती । तेनावसरेण जारश्च पलायितः ।
उक्तञ्च -

उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्वभावेनैव तच्छास्त्रं स्त्रीबुद्धौ सुप्रतिष्ठितम् ।। 123 ।।

तदालिङ्गनमवलोक्य समीपवर्तिनी कुट्टन्यचिन्तयत्- अकस्मादियमेनमुपगूढवती इति । ततस्तया कुट्टन्या तत्कारणं परिज्ञाय सा लीलावती गुप्तेन दण्डिता । अतोऽहं ब्रवीमि- "अकस्माद्युवती वृद्धम्" इत्यादि। मूषिकबलोपस्तम्भेन केनापि कारणेनात्र भवितव्यम् । क्षणं विचिन्त्य परिव्राजकेनोक्तम्-कारणं चात्र धनबाहुल्यमेव भविष्यति ।
यतः -

धनवान् बलवाँल्लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ।। 124 ।।

ततः खनित्रमादाय तेन परिव्राजकेन विवरं खनित्वा चिरसञ्चितं मम धनं गृहीतम् । ततः प्रभृति प्रत्यहं निजशक्तिहीनः सत्त्वोत्साहरहितः

स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दं मन्दमुपसर्पंश्चूडाकर्णेन अहमवलोकितः।

ततस्तेनोक्तम् -

धनेन बलवाँल्लोके धनाद्भवति पण्डितः ।
पश्यैनं मूषिकं पापं स्वजातिसमतां गतम् ।। 125 ।।

किञ्च -

अर्थेन तु विहीनस्य पुरुषस्याल्पमेधसः ।
क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ।। 126 ।।

अपरञ्च -

यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स हि पण्डितः ।। 127 ।।

अन्यच्च -

अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता ।।128।।

अपरञ्च -

तानीन्द्रियाण्यविकलानि तदेव नाम
सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव
ह्यन्यः क्षणेन भवतीति विचित्रमेतत् ।। 129 ।।

एतत्सर्वमाकर्ण्य मयाऽऽलोचितम्– ममाऽत्रावस्थानमयुक्तमिदानीम्। यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम् ।

यतः -

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।

वञ्चनं चापमानं च मतिमान्न प्रकाशयेत् ।। 130 ।।

अपि च -

आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।

तपो दानापमानं च नव गोप्यानि यत्नतः ।। 131 ।।

तथा चोक्तम् -

अत्यन्तविमुखे दैवे व्यर्थे यत्ने च पौरुषे ।

मनस्विनो दरिद्रस्य वनादन्यत्कुतः सुखम् ।। 132 ।।

अन्यच्च -

मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति ।

अपि निर्वाणमायाति नाऽनलो याति शीतताम् ।। 133 ।।

किञ्च -

कुसुमस्तबकस्येव द्वे वृत्ती तु मनस्विनः ।

सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येत वनेऽथवा ।। 134 ।।

यच्चाऽत्रैव याञ्च्या जीवनं तदप्यतीव गर्हितम् ।

यतः -

वरं विभवहीनेन प्राणैः सन्तर्पितोऽनलः ।

नोपचारपरिभ्रष्टः कृपणः प्रार्थ्यते जनः ।। 135 ।।

अन्यच्च -

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्त्वात्परिभ्रश्यते

निस्सत्त्वः परिभूयते परिभवान्निर्वेदमापद्यते ।

निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो ! निधनता सर्वापदामास्पदम् ॥ 136 ॥

किञ्च -

वरं मौनं कार्यं न च वचनमुक्तं यदनृतं
वरं क्लैब्यं पुंसां न च परकलत्राऽभिगमनम् ।
वरं प्राणत्यागो न च पिशुनवाक्येष्वभिरुचि-
र्वरं भिक्षाशित्वं न च परधनाऽऽस्वादनसुखम् ॥ 137 ॥
वरं शून्या शाला न च खलु वरो दुष्टवृषभो
वरं वेश्या पत्नी न पुनरविनीता कुलवधूः ।
वरं वासोऽरण्ये न पुनरविवेकाऽधिपपुरे
वरं प्राणत्यागो न पुनरधमानामुपगमः ॥ 138 ॥

अपि च -

सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यम् ।
हरिहरकथेव दुरितं गुणशतमप्यर्थिता हरति ॥ 139 ॥

इति विमृश्य तत्किमहं परपिण्डेनात्मानं पोषयामि ? कष्टं भोः । तदपि द्वितीयं मृत्युद्वारम् ।

यतः -

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥ 141 ॥

इत्यालोच्यापि लोभात्पुनरप्यर्थं ग्रहीतुं ग्रहमकरवम् ।

तथा चोक्तम् -

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।

तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥ 142 ॥

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंशखण्डेन ताडितोऽचिन्तयम्- लुब्धो ह्यसन्तुष्टो नियतात्मद्रोही भवति ।

तथा च -

सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ।

उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ 143 ॥

अपरञ्च -

सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।

कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ 144 ॥

किञ्च -

तेनाऽधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।

येनाऽऽशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥ 145 ॥

अपि च -

असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।

अनुक्तक्लीबवचनं धन्यं कस्यापि जीवनम् ॥ 146 ॥

यतः -

न योजनशतं दूरं बाध्यमानस्य तृष्णया।

सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥ 147 ॥

तदत्रावस्थोचितकार्यपरिच्छेदः श्रेयान् ।

को धर्मो भूतदया किं पाठान्तरम् –

नित्यमरोगिता जगति सौख्यमरोगिता जगति जन्तोः ।
कः स्नेहः ? सद्भावः किं पाण्डित्यं ? परिच्छेदः ।। 148 ।।

तथा च -

परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः ।
अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे ।। 149 ।।

तथाहि -

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ।। 150 ।।

अपरञ्च -

पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् ।
विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ।। 151 ।।

इत्यालोच्याऽहं निर्जनवनमागतः ।

यतः -

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयः पक्वफलाम्बुभोजनम् ।
तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवनम् ।। 152 ।।

योऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्याऽनुगृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः ।

यतः -

संसारविषवृक्षस्य द्वे एव रसवत्फले ।
काव्यामृतरसास्वादः सङ्गमः सुजनैः सह ।। 153 ।।

मन्थर उवाच-

अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवन-

मायुष्यं जललोलबिन्दुचपलं फेनोपमं जीवितम् ।

धर्मं यो न करोति निन्दितमतिः स्वर्गार्गलोद्घाटनं

पश्चात्तापयुतो जरापरिणतः शोकाग्निना दह्यते ॥ 154 ॥

युष्माभिरतिसञ्चयः कृतः। तस्यायं दोषः । शृणु ।

उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।

तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ 155 ॥

अन्यच्च -

यदधोऽधः क्षितौ वित्तं निचखान मितम्पचः ।

तदधो निलयं गन्तुं चक्रे पन्थानमग्रतः ॥ 156 ॥

अन्यच्च -

निजसौख्यं निरुन्धानो यो धनार्जनमिच्छति ।

परार्थभारवाहीव क्लेशस्यैव हि भाजनम् ॥ 157 ॥

अपरञ्च -

दानोपभोगहीनेन धनेन धनिनो यदि ।

भवामः किं न तेनैव धनेन धनिनो वयम् ॥ 158 ॥

अन्यच्च -

असम्भोगेन सामान्यं कृपणस्य धनं परैः ।

अस्येदमिति सम्बन्धो हानौ दुःखेन गम्यते ॥ 159॥

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।

वित्तं त्यागनियुक्तं दुर्लभमेतच्चतुष्टयं लोके ॥ 160 ॥

उक्तं च -

कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसञ्चयः ।

पश्य सञ्चयशीलोऽसौ धनुषा जम्बुको हतः ॥ 161 ॥

तावाहतुः- कथमेतत् ? मन्थरः कथयति-

कथा 7

अस्ति कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मांसलुब्धो धनुरादाय मृगमन्विष्यन्विन्ध्याटवीं गतः । तेन तत्र व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः । ततस्तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेणाहतः । शूकरेणापि घनघोरगर्जनं कृत्वा स व्याधो मुष्कदेशे हतः संश्छिन्नद्रुम इव भूमौ निपपात ।

यतः -

जलमग्निर्विषं शस्त्रं क्षुद्व्याधिः पतनं गिरेः ।

निमित्तं किञ्चिदासाद्य देही प्राणैर्विमुच्यते ॥ 162 ॥

अथ तयोः पादास्फालनेन सर्पोऽपि मृतः । अथानन्तरं दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान्मृतान्मृगव्याधसर्पशूकरानपश्यत्। अचिन्तयच्च - अहो ! भाग्यम् ! अद्य महद्भोज्यं मे समुपस्थितम् ।

अथवा -

अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम् ।

सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ 163 ॥

तद्भवतु । एषां मांसैर्मासत्रयं मे सुखेन गमिष्यति ।

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।

अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ 164 ॥

ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि । इत्युक्त्वा तथा कृते सति छिन्ने स्नायुबन्धनं उत्पतितेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पञ्चत्वं गतः । अतोऽहं ब्रवीमि- "कर्तव्यः सञ्चयो नित्यम्" इत्यादि।

तथा च -

यद्ददाति यदश्नाति तदेव धनिनो धनम् ।

अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ 165 ॥

किञ्च -

यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।

तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ 166 ॥

यातु । किमिदानीमतिक्रान्तोपवर्णनेन ।

यतः -

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।

आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥ 167 ॥

तत्सखे ! सर्वदा त्वया सोत्साहेन भवितव्यम् ।

यतः -

13 **शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान् ।**

सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगम् ॥ 168 ॥

अन्यच्च –

न स्वल्पमप्यध्यवसायभीरोः करोति विज्ञानविधिर्गुणं हि ।
अन्धस्य किं हस्ततलस्थितोऽपि प्रकाशयत्यर्थमिह प्रदीपः ॥ 169 ॥

तदत्र सखे ! दशातिशेषे शान्तिः करणीया । एतदप्यतिकष्टं त्वया न मन्तव्यम्।

यतः -

राजा कुलवधूर्विप्रा मन्त्रिणश्च पयोधराः ।
स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ॥ 170 ॥

इति विज्ञाय मतिमान्स्वस्थानं न परित्यजेत् । कापुरुषवचनमेतत् ।

यतः -

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः ।
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥ 171 ॥
को वीरस्य मनस्विनः स्वविषयः ? को वा विदेशस्तथा ?
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्यात्मनः ॥ 172 ॥

अपरञ्च -

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसम्पदः ॥ 173 ॥

अन्यच्च -

सुखमापतितं सेव्यं दुःखमापतितं तथा ।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ॥ 174 ॥

अन्यच्च –

उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ।। 175 ।।

विशेषतश्च -

विनाप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं
समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः ।
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ।। 176 ।।

किञ्च -

धनवानिति हि मदस्ते किं गतविभवो विषादमुपयासि ? ।
करनिहतकन्दुकसमाः पातोत्पाता मनुष्याणाम् ।। 177 ।।

अपरञ्च -

अभ्रच्छाया खलप्रीतिर्नवसस्यानि योषितः ।
किञ्चित्कालोपभोग्यानि यौवनानि धनानि च ।। 178 ।।

अन्यच्च –

वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ।। 179 ।।

अपि च सखे ! शृणु -

येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ।। 180 ।।

अपरञ्च - सतां रहस्यं शृणु, मित्र !

जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु ।
मोहयन्ति च सम्पत्तौ कथमर्थाः सुखावहाः ।। 181 ।।

अपरञ्च -

धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।। 182 ।।

यतः -

यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि ।
भक्ष्यते सलिले नक्रैस्तथा सर्वत्र वित्तवान् ।। 183 ।।

अन्यच्च -

राजतः सलिलादग्नेश्चौरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ।। 184 ।।

तथा हि -

जन्मनि क्लेशबहुले किं नु दुःखमतः परम् ।
इच्छासम्पद्यतो नास्ति यच्चेच्छा न निवर्तते ।। 185 ।।

अन्यच्च भ्रातः ! शृणु -

धनं तावदसुलभं लब्धं कृच्छ्रेण रक्ष्यते ।
लब्धनाशो यथा मृत्युस्तस्मादेतन्न चिन्तयेत् ।। 186 ।।
तृष्णां चेह परित्यज्य को दरिद्रः ? क ईश्वरः ?।
तस्याश्चेत्प्रसरो दत्तो दास्यं च शिरसि स्थितम् ।। 187 ।।

अपरञ्च -

यद्यदेव हि वाञ्छेत ततो वाञ्छानुवर्तते ।
प्राप्तः एवार्थतः सोऽर्थो यतो वाञ्छा निवर्तते ।। 188 ।।

किं बहुना । मम पक्षपातेन मयैव सहात्र कालो नीयताम् ।

यतः -

आमरणान्ताः प्रणयाः कोपास्तत्क्षणभङ्गुराः ।

परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनाम् ॥ 189 ॥

इति श्रुत्वा लघुपतनको ब्रूते-धन्योऽसि मन्थर ! सर्वदा श्लाघ्यगुणोऽसि ।

यतः -

सन्त एव सतां नित्यमापदुद्धरणक्षमाः ।

गजानां पङ्कमग्नानां गजा एव धुरन्धराः ॥ 190 ॥

अपरञ्च -

श्लाघ्यः स एको भुवि मानवानां

स उत्तमः सत्पुरुषः स धन्यः ।

यस्यार्थिनो वा शरणागता वा

नाशाभिभङ्गाद्विमुखाः प्रयान्ति ॥ 191 ॥

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुष्टाः सुखं निवसन्ति स्म । अथ कदाचिच्चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः । ततः तत्पश्चादायान्तं भयहेतुमालोक्य मन्थरो जलं प्रविष्टः । मूषिकश्च विवरं गतः। काकोऽप्युड्डीय वृक्षाग्रमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यतीत्यालोचितम्। पश्चात्तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः। मन्थरेणोक्तम्-भद्रम् ! मृग स्वागतम्। स्वेच्छयोद-काद्याहारोऽनुभूयताम् । अत्रावस्थानेन वनमिदं सनाथीक्रियताम् । चित्राङ्गो ब्रूते- लुब्धकत्रासितोऽहं भवतां शरणमागतः । ततश्च भवद्भिः सह

सख्यमिच्छामि । हिरण्यकोऽवदत्- मित्र तत्तावदस्माभिः सहायत्वेन निष्पन्नमेव भवतः ।

यतः -

औरसं कृतसम्बन्धं तथा वंशक्रमागतम् ।

रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम् ।। 192 ।।

तदत्र भवता स्वगृहनिर्विशेषं स्थीयताम् । तच्छ्रुत्वा मृगः सानन्दो भूत्वा स्वेच्छाहारं कृत्वा पानीयं पीत्वा जलासन्नवटतरुच्छायायामुपविष्टः ।

अथ मन्थरेणोक्तम्-सखे मृग! एतस्मिन्निर्जने वने केन त्रासितोऽसि? कदाचित्किं व्याधाः सञ्चरन्ति। मृगेणोक्तम्- अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिः। स च दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्तते । प्रातश्च तेनात्रागत्य कर्पूरसरः समीपे भवितव्यमिति व्याधानां मुखात्किंवदन्ती श्रूयते। तदत्रापि प्रातरवस्थानं भयहेतुकमित्यालोच्य यथावसरकार्यमारभ्यताम्। तच्छ्रुत्वा कूर्मः सभयमाह — जलाशयान्तरं गच्छामि । काकमृगावप्युक्तवन्तौ — मित्र ! एवमस्तु । ततो हिरण्यको विहस्याह- जलाशयान्तरे प्राप्ते मन्थरस्य कुशलम् । स्थले गच्छतः कः प्रतीकारः ?

यतः-

अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवसिनाम् ।

स्वभूमिः श्वापदादीनां राज्ञां मन्त्री परं बलम् ।। 193 ।।

सखे ! लघुपतनक ! अनेनोपदेशेन तथा भवितव्यम् ।

स्वयं वीक्ष्य यथा वध्वाः पीडितं कुचकुड्मलम् ।

वणिक्पुत्रोऽभवद्दुःखी त्वं तथैव भविष्यसि ।। 194 ।।

ते ऊचुः - कथमेतत् । हिरण्यकः कथयति-

कथा - 8

अस्ति कान्यकुब्जविषये वीरसेनो नाम राजा । तेन वीरपुरनाम्नि नगरे तुङ्गबलो नाम राजपुत्रो भोगपतिः कृतः । स च महाधनस्तरुण एकदा स्वनगरे भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं नाम वणिक्पुत्रवधूमलोकयामास। ततः स्वहर्म्यं गत्वा स्मराकुलमतिस्तस्याः कृते दूतीं प्रेषितवान् ।

यतः-

सन्मार्गे तावदास्ते प्रभवति पुरुषस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ।। 195 ।।

सापि लावण्यवती तदवलोकनक्षणात्प्रभृति स्मरशरप्रहारजर्जरितहृदया तदेकचित्ताभवत् ।

तथा ह्युक्तम् -

असत्यं साहसं माया मात्सर्यं चातिलुब्धता ।
निर्गुणत्वमशौचत्वं स्त्रीणां दोषाः स्वभावजाः ।। 196 ।।

अथ दूतीवचनं श्रुत्वा लावण्यवत्युवाच-अहं पतिव्रता कथमेतस्मिन्नधर्मे पतिलङ्घने प्रवर्ते ।

यतः-

सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ।। 197 ।।

न सा भार्येति वक्तव्या यस्या भर्ता न तुष्यति ।

तुष्टे भर्तरि नारीणां सन्तुष्टाः सर्वदेवताः ॥ 198 ॥

ततो यद्यदादिशति मे प्राणेश्वरस्तदेवाहमविचारितं करोमि । दूत्योक्तम्-सत्यतममेतत् । लावण्यवत्युवाच-ध्रुवं सत्यमेतत् । ततो दूतिकया गत्वा तत्तत्सर्वं तुङ्गबलस्याग्रे निवेदितम् । तच्छ्रुत्वा तुङ्गबलोऽब्रवीत्-स्वामिनानीय समर्पयितव्या इति, कथमेतच्छक्यम् । कुट्टन्याह-उपायः क्रियताम् ।

तथा चोक्तम् -

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।

शृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना ॥ 199 ॥

राजपुत्रः पृच्छत-कथमेतत् । सा कथयति –

कथा 9

अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म-यद्ययं केनाप्युपायेन म्रियते तदाऽस्माकमेतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति । तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम्-मया बुद्धिप्रभावादस्य मरणं साधयितव्यम् । अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्योवाच–देव ! दृष्टिप्रसादं कुरु । हस्ती ब्रूते–कस्त्वम् ? कुतः समायातः ? सोऽवदत्-जम्बुकोऽहम् । सर्वैर्वनवासिभिः पशुभिर्मिलित्वा भवत्सकाशं प्रस्थापितः । यद्विना

राज्ञाऽवस्थातुं न युक्तम्, तदत्राटवीराज्येऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः ।

यतः -

यः कुलाभिजनाचारैरतिशुद्धः प्रतापवान् ।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ 200 ॥

अपरञ्च -

राजानं प्रथमं विन्देत्ततो भार्यां ततो धनम् ।
राजन्यसति लोकेऽस्मिन्कुतो भार्या ? कुतो धनम् ? ॥ 201 ॥

अन्यच्च -

पर्जन्य इव भूतानामाधारः पृथिवीपतिः।
विकलेऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ 202 ॥

किञ्च -

नियतविषयवर्ती प्रायशो दण्डयोगा-
ज्जगति परवशेऽस्मिन्दुर्लभः साधुवृत्तः ।
कृशमपि विकलं वा व्याधितं वाऽधनं वा
पतिमपि कुलनारी दण्डभीत्याऽभ्युपैति ॥ 203 ॥

तद्यथा लग्नवेला न विचलति तथा कृत्वा सत्वरमागम्यतां देवेन । इत्युक्त्वोत्थाय चलितः । ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालदर्शितवर्त्मना धावन्महापङ्के निमग्नः । ततस्तेन हस्तिनोक्तम्-सखे शृगाल ! किमधुना विधेयम् ? पङ्के निपतितोऽहं म्रिये । परावृत्य पश्य । शृगालेन विहस्योक्तम्—देव ! मम पुच्छकावलम्बनं कृत्वोत्तिष्ठ । यन्मद्विधस्य वचसि त्वया प्रत्ययः कृतस्तस्य फलमेतत् । तदनुभूयतामशरणं दुःखम् ।

तथा चोक्तम् -

यदि सत्सङ्गरहितो भविष्यसि भविष्यसि ।

तथाऽसज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ 204 ॥

ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः । अतोऽहं ब्रवीमि- उपायेन हि यच्छक्यम् ... इत्यादि ।

ततः कुट्टिन्युपदेशेन तं चारुदत्तनामानं वणिक्पुत्रं स राजपुत्रः सेवकं चकार । ततोऽसौ तेन सर्वविश्वासकार्येषु नियोजितः ।

एकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकरत्नालङ्कारधारिणा प्रोक्तम्- अद्यारभ्य मासमेकं गौरीव्रतं कर्तव्यम् ।

तदत्र प्रतिरात्रमेकां कुलीनां युवतीमानीय समर्पय । सा मया यथोचितेन विधिना पूजयितव्या । ततः स चारुदत्तस्तथाविधां नवयुवतीमानीय समर्पयति। पश्चात्प्रच्छन्नः सन्किमयं करोतीति निरूपयति । स च तुङ्गबलस्तां युवतीमस्पृशन्नेव दूराद्वस्त्राद्यालङ्कारगन्धचन्दनैः सम्पूज्य रक्षकं दत्त्वा प्रस्थापयति । अथ वणिक्पुत्रेण तद्दृष्ट्वोपजातविश्वासेन लोभाकृष्टमनसा स्ववधूर्लावण्यवतीं समानीय समर्पिता ।

स च तुङ्गबलस्तां हृदयप्रियां लावण्यवतीं विज्ञाय ससम्भ्रममुत्थाय निर्भरमालिङ्ग्य निमीलिताक्षः पर्यङ्के तया सह विललास । तदवलोक्य वणिक्पुत्रश्चित्रलिखित इवेतिकर्तव्यतामूढः परं विषादमुपगतः । अतोऽहं ब्रवीमि-स्वयं वीक्ष्य इत्यादि ।

तथा त्वयापि भवितव्यम् इति । ततः तद्धितवचनमवधीर्य महता भयेन विमुग्ध इव तं जलाशयमुत्सृज्य मन्थरश्चलितः । तेऽपि हिरण्यकादयः

स्नेहादनिष्टं शङ्कमाना मन्थरमनुगच्छन्ति । ततः स्थले गच्छन्केनापि व्याधेन काननं पर्यटता मन्थरः प्राप्तः ।

प्राप्य स च तं गृहीत्वोत्थाप्य धनुषि बद्ध्वा "धन्योऽस्मि" इत्यभिधाय भ्रमन्क्लेशात्क्षुत्पिपासाकुलः स्वगृहाभिमुखः चलितः । अथ ते मृगवायसमूषिकाः परं विषादं गच्छन्तस्तमनुजग्मुः । ततो हिरण्यको विलपति-

एकस्य दुःखस्य न यावदन्तं
गच्छाम्यहं पारमिवार्णवस्य ।
तावद्द्वितीयं समुपस्थितं मे
छिद्रेष्वनर्था बहुलीभवन्ति ॥ 205 ॥

स्वाभाविकं तु यन्मित्रं भाग्येनैवाभिजायते ।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ॥ 206 ॥

अपिच - **न मातरि न दारेषु न सोदर्ये न चात्मजे ।**
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे ॥ 207 ॥

इति मुहुर्विचिन्त्य प्राह - अहो मे दुर्दैवम् ।

यतः-

स्वकर्मसन्तानविचेष्टितानि
कालान्तरावर्तिशुभाशुभानि ।
इहैव दृष्टानि मयैव तानि
जन्मान्तराणीव दशान्तराणि ॥ 208 ॥

अथवेत्थमेवैतत् –

कायः सन्निहितापायः सम्पदः पदमापदाम् ।

समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ।। 209 ।।

पुनर्विमृश्याह -

शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम् ।

केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ? ।। 210 ।।

किञ्च -

मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः

पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम् ।

ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-

स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ।। 211 ।।

इति बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह-यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम् । तावूचतुः-सत्वरं कार्यमुच्यताम् ।

हिरण्यको ब्रूते-चित्राङ्गो जलसमीपं गत्वा मृतमिवात्मानं निश्चेष्टं दर्शयतु । काकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि विलिखतु । नूनमनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना सत्वरं गन्तव्यम् । ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि। सन्निहिते लुब्धके भवद्भ्यां पलायितव्यम् । ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः श्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टस्तथाविधं मृगमपश्यत् ।

ततः कर्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः । तत्रान्तरे हिरण्यकेनागत्य मन्थरस्य बन्धनं छिन्नम् । स कूर्मः सत्वरं जलाशयं प्रविवेश । स मृगः आसन्नं तं व्याधं विलोक्योत्थाय पलायितः। प्रत्यावृत्य

लुब्धको यावत्तरुतलमायाति तावत्कूर्ममपश्यन्नचिन्तयत्- उचितमेवैतन्ममा-समीक्ष्यकारिणः ।

यतः -

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।

ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥ 212 ॥

ततोऽसौ स्वकर्मवशान्निराशः कटकं प्रविष्टः । मन्थरादयश्च सर्वे त्यक्तापदः स्वस्थानं गत्वा तथा सुखमास्थिताः ।

अथ राजपुत्रैः सानन्दमुक्तम्-सर्वं श्रुतवन्तः सुखिनो वयम् । सिद्धं नः समीहितम् । विष्णुशर्मोवाच - एतावता भवतामभिलषितं सम्पन्नम् । अपरमपीदमस्तु-

मित्रं प्राप्नुत सज्जना जनपदैर्लक्ष्मीः समालभ्यतां

भूपालाः परिपालयन्तु वसुधां शश्वत्स्वधर्मे स्थिताः ।

आस्तां मानसतुष्टये सुकृतिनां नीतिर्नवोढेव वः

कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्धचूडामणिः ॥ 213 ॥

इति हितोपदेशे मित्रलाभो नाम प्रथमः कथासङ्ग्रहः समाप्तः ।

तुद व्यथने - परस्मैपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तुदति	तुदतः	तुदन्ति
मध्यमपुरुषः	तुदसि	तुदथः	तुदथ
उत्तमपुरुषः	तुदामि	तुदावः	तुदामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	तुदतः	______
मध्यमपुरुषः	तुदसि	______	तुदथ
उत्तमपुरुषः	______	तुदावः	______

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तोत्स्यति	तोत्स्यतः	तोत्स्यन्ति
मध्यमपुरुषः	तोत्स्यसि	तोत्स्यथः	तोत्स्यथ
उत्तमपुरुषः	तोत्स्यामि	तोत्स्यावः	तोत्स्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तोत्स्यति	______	तोत्स्यन्ति
मध्यमपुरुषः	______	तोत्स्यथः	______
उत्तमपुरुषः	तोत्स्यामि	______	तोत्स्यामः

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तुदतु/तुदतात्	तुदताम्	तुदन्तु
मध्यमपुरुषः	तुद/तुदतात्	तुदतम्	तुदत
उत्तमपुरुषः	तुदानि	तुदाव	तुदाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	तुदताम्	______
मध्यमपुरुषः	तुद/तुदतात्	______	तुदत
उत्तमपुरुषः	______	तुदाव	______

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अतुदत्	अतुदताम्	अतुदन्
मध्यमपुरुषः	अतुदः	अतुदतम्	अतुदत
उत्तमपुरुषः	अतुदम्	अतुदाव	अतुदाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अतुदत्	______	अतुदन्
मध्यमपुरुषः	______	अतुदतम्	______
उत्तमपुरुषः	अतुदम्	______	अतुदाम

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तुदेत्	तुदेताम्	तुदेयुः
मध्यमपुरुषः	तुदेः	तुदेतम्	तुदेत
उत्तमपुरुषः	तुदेयम्	तुदेव	तुदेम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	तुदेताम्	______
मध्यमपुरुषः	तुदेः	______	तुदेत
उत्तमपुरुषः	______	तुदेव	______

तुद व्यथने - आत्मनेपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तुदते	तुदेते	तुदन्ते
मध्यमपुरुषः	तुदसे	तुदेथे	तुदध्वे
उत्तमपुरुषः	तुदे	तुदावहे	तुदामहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तुदते	______	तुदन्ते
मध्यमपुरुषः	______	तुदेथे	______
उत्तमपुरुषः	तुदे	______	तुदामहे

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तोत्स्यते	तोत्स्येते	तोत्स्यन्ते
मध्यमपुरुषः	तोत्स्यसे	तोत्स्येथे	तोत्स्यध्वे
उत्तमपुरुषः	तोत्स्ये	तोत्स्यावहे	तोत्स्यामहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	_____	तोत्स्येते	_____
मध्यमपुरुषः	तोत्स्यसे	_____	तोत्स्यध्वे
उत्तमपुरुषः	_____	तोत्स्यावहे	_____

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तुदताम्	तुदेताम्	तुदन्ताम्
मध्यमपुरुषः	तुदस्व	तुदेथाम्	तुदध्वम्
उत्तमपुरुषः	तुदै	तुदावहै	तुदामहै

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तुदताम्	_____	तुदन्ताम्
मध्यमपुरुषः	_____	तुदेथाम्	_____
उत्तमपुरुषः	तुदै	_____	तुदामहै

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अतुदत	अतुदेताम्	अतुदन्त
मध्यमपुरुषः	अतुदथाः	अतुदेथाम्	अतुदध्वम्
उत्तमपुरुषः	अतुदे	अतुदावहि	अतुदामहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	अतुदेताम्	______
मध्यमपुरुषः	अतुदथाः	______	अतुदध्वम्
उत्तमपुरुषः	______	अतुदावहि	______

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तुदेत	तुदेयाताम्	तुदेरन्
मध्यमपुरुषः	तुदेथाः	तुदेयाथाम्	तुदेध्वम्
उत्तमपुरुषः	तुदेय	तुदेवहि	तुदेमहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तुदेत	______	तुदेरन्
मध्यमपुरुषः	______	तुदेयाथाम्	______
उत्तमपुरुषः	तुदेय	______	तुदेमहि

रुध् (रुधिर्) आवरणे - परस्मैपदिनः

लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रुणद्धि	रुन्धः	रुन्धन्ति
मध्यमपुरुषः	रुणत्सि	रुन्द्धः	रुन्द्ध
उत्तमपुरुषः	रुणध्मि	रुन्ध्वः	रुन्ध्मः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	रुन्धः	______
मध्यमपुरुषः	रुणत्सि	______	रुन्द्ध
उत्तमपुरुषः	______	रुन्ध्वः	______

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रोत्स्यति	रोत्स्यतः	रोत्स्यन्ति
मध्यमपुरुषः	रोत्स्यसि	रोत्स्यथः	रोत्स्यथ
उत्तमपुरुषः	रोत्स्यामि	रोत्स्यावः	रोत्स्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	रोत्स्यति	______	रोत्स्यन्ति
मध्यमपुरुषः	______	रोत्स्यथः	______
उत्तमपुरुषः	रोत्स्यामि	______	रोत्स्यामः

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रुणद्धु/रुन्द्धात्	रुन्द्धाम्	रुन्धन्तु
मध्यमपुरुषः	रुन्द्धि/रुन्द्धात्	रुन्द्धम्	रुन्द्ध
उत्तमपुरुषः	रुणधानि	रुणधाव	रुणधाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	रुन्द्धाम्	______
मध्यमपुरुषः	रुन्द्धि/रुन्द्धात्	______	रुन्द्ध
उत्तमपुरुषः	______	रुणधाव	______

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अरुणत्	अरुन्द्धाम्	अरुन्धन्
मध्यमपुरुषः	अरुणत्/अरुणः	अरुन्द्धम्	अरुन्द्ध
उत्तमपुरुषः	अरुणधम्	अरुन्ध्व	अरुन्ध्म

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अरुणत्	______	अरुन्धन्
मध्यमपुरुषः	______	अरुन्द्धम्	______
उत्तमपुरुषः	अरुणधम्	______	अरुन्ध्म

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः
मध्यमपुरुषः	रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात
उत्तमपुरुषः	रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	रुन्ध्याताम्	______
मध्यमपुरुषः	रुन्ध्याः	______	रुन्ध्यात
उत्तमपुरुषः	______	रुन्ध्याव	______

रुध् (रुधिर्) आवरणे - आत्मनेपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रुन्द्धे	रुन्धाते	रुन्धते
मध्यमपुरुषः	रुन्त्से	रुन्धाथे	रुन्द्धे
उत्तमपुरुषः	रुन्धे	रुन्ध्वहे	रुन्ध्महे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	रुन्द्धे	______	रुन्धते
मध्यमपुरुषः	______	रुन्धाथे	______
उत्तमपुरुषः	रुन्धे	______	रुन्ध्महे

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रोत्स्यते	रोत्स्येते	रोत्स्यन्ते
मध्यमपुरुषः	रोत्स्यसे	रोत्स्येथे	रोत्स्यध्वे
उत्तमपुरुषः	रोत्स्ये	रोत्स्यावहे	रोत्स्यामहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	_____	रोत्स्येते	_____
मध्यमपुरुषः	रोत्स्यसे	_____	रोत्स्यध्वे
उत्तमपुरुषः	_____	रोत्स्यावहे	_____

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रुन्द्धाम्	रुन्धाताम्	रुन्धताम्
मध्यमपुरुषः	रुन्त्स्व	रुन्धाथाम्	रुन्द्धम्
उत्तमपुरुषः	रुणधै	रुणधावहै	रुणधामहै

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	रुन्द्धाम्	_____	रुन्धताम्
मध्यमपुरुषः	_____	रुन्धाथाम्	_____
उत्तमपुरुषः	रुणधै	_____	रुणधामहै

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अरुन्द्ध	अरुन्द्धाताम्	अरुन्धत
मध्यमपुरुषः	अरुन्धाः	अरुन्धाथाम्	अरुन्द्धम्
उत्तमपुरुषः	अरुन्धि	अरुन्ध्वहि	अरुन्ध्महि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	अरुन्द्धाताम्	______
मध्यमपुरुषः	अरुन्धाः	______	अरुन्द्धम्
उत्तमपुरुषः	______	अरुन्ध्वहि	______

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	रुन्धीत	रुन्धीयाताम्	रुन्धीरन्
मध्यमपुरुषः	रुन्धीथाः	रुन्धीयाथाम्	रुन्धीध्वम्
उत्तमपुरुषः	रुन्धीय	रुन्धीवहि	रुन्धीमहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	रुन्धीत	______	रुन्धीरन्
मध्यमपुरुषः	______	रुन्धीयाथाम्	______
उत्तमपुरुषः	रुन्धीय	______	रुन्धीमहि

तन् (तनु) विस्तारे - परस्मैपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तनोति	तनुतः	तन्वन्ति
मध्यमपुरुषः	तनोषि	तनुथः	तनुथ
उत्तमपुरुषः	तनोमि	तनुवः/तन्वः	तनुमः/तन्मः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	_____	तनुतः	_____
मध्यमपुरुषः	तनोषि	_____	तनुथ
उत्तमपुरुषः	_____	तनुवः/तन्वः	_____

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तनिष्यति	तनिष्यतः	तनिष्यन्ति
मध्यमपुरुषः	तनिष्यसि	तनिष्यथः	तनिष्यथ
उत्तमपुरुषः	तनिष्यामि	तनिष्यावः	तनिष्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तनिष्यति	_____	तनिष्यन्ति
मध्यमपुरुषः	_____	तनिष्यथः	_____
उत्तमपुरुषः	तनिष्यामि	_____	तनिष्यामः

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तनोतु/तनुतात्	तनुताम्	तन्वन्तु
मध्यमपुरुषः	तनु/तनुतात्	तनुतम्	तनुत
उत्तमपुरुषः	तनवानि	तनवाव	तनवाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	_____	तनुताम्	_____
मध्यमपुरुषः	तनु/तनुतात्	_____	तनुत
उत्तमपुरुषः	_____	तनवाव	_____

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अतनोत्	अतनुताम्	अतन्वन्
मध्यमपुरुषः	अतनोः	अतनुतम्	अतनुत
उत्तमपुरुषः	अतनवम्	अतन्व/अतनुव	अतन्म/अतनुम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अतनोत्	_____	अतन्वन्
मध्यमपुरुषः	_____	अतनुतम्	_____
उत्तमपुरुषः	अतनवम्	_____	अतन्म/अतनुम

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तनुयात्	तनुयाताम्	तनुयुः
मध्यमपुरुषः	तनुयाः	तनुयातम्	तनुयात
उत्तमपुरुषः	तनुयाम्	तनुयाव	तनुयाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	तनुयाताम्	______
मध्यमपुरुषः	तनुयाः	______	तनुयात
उत्तमपुरुषः	______	तनुयाव	______

तन् (तनु) विस्तारे - आत्मनेपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तनुते	तन्वाते	तन्वते
मध्यमपुरुषः	तनुषे	तन्वाथे	तनुध्वे
उत्तमपुरुषः	तन्वे	तनुवहे/तन्वहे	तनुमहे/तन्महे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तनुते	______	तन्वते
मध्यमपुरुषः	______	तन्वाथे	______
उत्तमपुरुषः	तन्वे	______	तनुमहे/तन्महे

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तनिष्यते	तनिष्येते	तनिष्यन्ते
मध्यमपुरुषः	तनिष्यसे	तनिष्येथे	तनिष्यध्वे
उत्तमपुरुषः	तनिष्ये	तनिष्यावहे	तनिष्यामहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	_____	तनिष्येते	_____
मध्यमपुरुषः	तनिष्यसे	_____	तनिष्यध्वे
उत्तमपुरुषः	_____	तनिष्यावहे	_____

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तनुताम्	तन्वाताम्	तन्वताम्
मध्यमपुरुषः	तनुष्व	तन्वाथाम्	तनुध्वम्
उत्तमपुरुषः	तनवै	तनवावहै	तनवामहै

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तनुताम्	_____	तन्वताम्
मध्यमपुरुषः	_____	तन्वाथाम्	_____
उत्तमपुरुषः	तनवै	_____	तनवामहै

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अतनुत	अतन्वाताम्	अतन्वत
मध्यमपुरुषः	अतनुथाः	अतन्वाथाम्	अतनुध्वम्
उत्तमपुरुषः	अतन्वि	अतन्वहि/अतनुवहि	अतन्महि/अतनुमहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	अतन्वाताम्	______
मध्यमपुरुषः	अतनुथाः	______	अतनुध्वम्
उत्तमपुरुषः	______	अतन्वहि/अतनुवहि	______

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	तन्वीत	तन्वीयाताम्	तन्वीरन्
मध्यमपुरुषः	तन्वीथाः	तन्वीयाथाम्	तन्वीध्वम्
उत्तमपुरुषः	तन्वीय	तन्वीवहि	तन्वीमहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	तन्वीत	______	तन्वीरन्
मध्यमपुरुषः	______	तन्वीयाथाम्	______
उत्तमपुरुषः	तन्वीय	______	तन्वीमहि

क्री (डुक्रीञ्) द्रव्यविनिमये - परस्मैपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रीणाति	क्रीणीतः	क्रीणन्ति
मध्यमपुरुषः	क्रीणासि	क्रीणीथः	क्रीणीथ
उत्तमपुरुषः	क्रीणामि	क्रीणीवः	क्रीणीमः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	क्रीणीतः	______
मध्यमपुरुषः	क्रीणासि	______	क्रीणीथ
उत्तमपुरुषः	______	क्रीणीवः	______

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रेष्यति	क्रेष्यतः	क्रेष्यन्ति
मध्यमपुरुषः	क्रेष्यसि	क्रेष्यथः	क्रेष्यथ
उत्तमपुरुषः	क्रेष्यामि	क्रेष्यावः	क्रेष्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	क्रेष्यति	______	क्रेष्यन्ति
मध्यमपुरुषः	______	क्रेष्यथः	______
उत्तमपुरुषः	क्रेष्यामि	______	क्रेष्यामः

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रीणातु/क्रीणीतात्	क्रीणीताम्	क्रीणन्तु
मध्यमपुरुषः	क्रीणीहि/क्रीणीतात्	क्रीणीतम्	क्रीणीत
उत्तमपुरुषः	क्रीणानि	क्रीणाव	क्रीणाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	क्रीणीताम्	______
मध्यमपुरुषः	क्रीणीहि/क्रीणीतात्	______	क्रीणीत
उत्तमपुरुषः	______	क्रीणाव	______

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अक्रीणीत्	अक्रीणीताम्	अक्रीणन्
मध्यमपुरुषः	अक्रीणाः	अक्रीणीतम्	अक्रीणीत
उत्तमपुरुषः	अक्रीणाम्	अक्रीणीव	अक्रीणीम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अक्रीणात्	______	अक्रीणन्
मध्यमपुरुषः	______	अक्रीणीतम्	______
उत्तमपुरुषः	अक्रीणाम्	______	अक्रीणीम

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः
मध्यमपुरुषः	क्रीणीयाः	क्रीणीयातम्	क्रीणीयात
उत्तमपुरुषः	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	क्रीणीयाताम्	______
मध्यमपुरुषः	क्रीणीयाः	______	क्रीणीयात
उत्तमपुरुषः	______	क्रीणीयाव	______

क्री (डुक्रीञ्) द्रव्यविनिमये - आत्मनेपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रीणीते	क्रीणाते	क्रीणते
मध्यमपुरुषः	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
उत्तमपुरुषः	क्रीणे	क्रीणीवहे	क्रीणीमहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	क्रीणाते	______
मध्यमपुरुषः	क्रीणीषे	______	क्रीणीध्वे
उत्तमपुरुषः	______	क्रीणीवहे	______

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रेष्यते	क्रेष्येते	क्रेष्यन्ते
मध्यमपुरुषः	क्रेष्यसे	क्रेष्येथे	क्रेष्यध्वे
उत्तमपुरुषः	क्रेष्ये	क्रेष्यावहे	क्रेष्यामहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	क्रेष्यते	______	क्रेष्यन्ते
मध्यमपुरुषः	______	क्रेष्येथे	______
उत्तमपुरुषः	क्रेष्ये	______	क्रेष्यामहे

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रीणीताम्	क्रीणाताम्	क्रीणताम्
मध्यमपुरुषः	क्रीणीष्व	क्रीणाथाम्	क्रीणीध्वम्
उत्तमपुरुषः	क्रीणै	क्रीणावहै	क्रीणामहै

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	क्रीणाताम्	______
मध्यमपुरुषः	क्रीणीष्व	______	क्रीणीध्वम्
उत्तमपुरुषः	______	क्रीणावहै	______

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अक्रीणीत	अक्रीणाताम्	अक्रीणत
मध्यमपुरुषः	अक्रीणीथाः	अक्रीणाथाम्	अक्रीणीध्वम्
उत्तमपुरुषः	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अक्रीणीत	______	अक्रीणत
मध्यमपुरुषः	______	अक्रीणाथाम्	______
उत्तमपुरुषः	अक्रीणि	______	अक्रीणीमहि

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	क्रीणीत	क्रीणीयाताम्	क्रीणीरन्
मध्यमपुरुषः	क्रीणीथाः	क्रीणीयाथाम्	क्रीणीध्वम्
उत्तमपुरुषः	क्रीणीय	क्रीणीवहि	क्रीणीमहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	क्रीणीयाताम्	______
मध्यमपुरुषः	क्रीणीथाः	______	क्रीणीध्वम्
उत्तमपुरुषः	______	क्रीणीवहि	______

चुर् स्तेये - परस्मैपदिनः

लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयति	चोरयतः	चोरयन्ति
मध्यमपुरुषः	चोरयसि	चोरयथः	चोरयथ
उत्तमपुरुषः	चोरयामि	चोरयावः	चोरयामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	चोरयतः	______
मध्यमपुरुषः	चोरयसि	______	चोरयथ
उत्तमपुरुषः	______	चोरयावः	______

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयिष्यति	चोरयिष्यतः	चोरयिष्यन्ति
मध्यमपुरुषः	चोरयिष्यसि	चोरयिष्यथः	चोरयिष्यथ
उत्तमपुरुषः	चोरयिष्यामि	चोरयिष्यावः	चोरयिष्यामः

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	चोरयिष्यति	______	चोरयिष्यन्ति
मध्यमपुरुषः	______	चोरयिष्यथः	______
उत्तमपुरुषः	चोरयिष्यामि	______	चोरयिष्यामः

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयतु/चोरयतात्	चोरयताम्	चोरयन्तु
मध्यमपुरुषः	चोरय/चोरयतात्	चोरयतम्	चोरयत
उत्तमपुरुषः	चोरयाणि	चोरयाव	चोरयाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	_____	चोरयताम्	_____
मध्यमपुरुषः	चोरय/चोरयतात्	_____	चोरयत
उत्तमपुरुषः	_____	चोरयाव	_____

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अचोरयत्	अचोरयताम्	अचोरयन्
मध्यमपुरुषः	अचोरयः	अचोरयतम्	अचोरयत
उत्तमपुरुषः	अचोरयम्	अचोरयाव	अचोरयाम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	अचोरयत्	_____	अचोरयन्
मध्यमपुरुषः	_____	अचोरयतम्	_____
उत्तमपुरुषः	अचोरयम्	_____	अचोरयाम

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयेत्	चोरयेताम्	चोरयेयुः
मध्यमपुरुषः	चोरयेः	चोरयेतम्	चोरयेत
उत्तमपुरुषः	चोरयेयम्	चोरयेव	चोरयेम

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	चोरयेताम्	______
मध्यमपुरुषः	चोरयेः	______	चोरयेत
उत्तमपुरुषः	______	चोरयेव	______

चुर् स्तेये - आत्मनेपदिनः
लट्-लकारः (वर्तमान-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयते	चोरयेते	चोरयन्ते
मध्यमपुरुषः	चोरयसे	चोरयेथे	चोरयध्वे
उत्तमपुरुषः	चोरये	चोरयावहे	चोरयामहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	चोरयते	______	चोरयन्ते
मध्यमपुरुषः	______	चोरयेथे	______
उत्तमपुरुषः	चोरये	______	चोरयामहे

लृट्-लकारः (भविष्यत्-कालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयिष्यते	चोरयिष्येते	चोरयिष्यन्ते
मध्यमपुरुषः	चोरयिष्यसे	चोरयिष्येथे	चोरयिष्यध्वे
उत्तमपुरुषः	चोरयिष्ये	चोरयिष्यावहे	चोरयिष्यामहे

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	चोरयिष्येते	______
मध्यमपुरुषः	चोरयिष्यसे	______	चोरयिष्यध्वे
उत्तमपुरुषः	______	चोरयिष्यावहे	______

लोट्-लकारः (आज्ञार्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयताम्	चोरयेताम्	चोरयन्ताम्
मध्यमपुरुषः	चोरयस्व	चोरयेथाम्	चोरयध्वम्
उत्तमपुरुषः	चोरयै	चोरयावहै	चोरयामहै

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	चोरयताम्	______	चोरयन्ताम्
मध्यमपुरुषः	______	चोरयेथाम्	______
उत्तमपुरुषः	चोरयै	______	चोरयामहै

लङ्-लकारः (भूतकालः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	अचोरयत	अचोरयेताम्	अचोरयन्त
मध्यमपुरुषः	अचोरयथाः	अचोरयेथाम्	अचोरयध्वम्
उत्तमपुरुषः	अचोरये	अचोरयावहि	अचोरयामहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	______	अचोरयेताम्	______
मध्यमपुरुषः	अचोरयथाः	______	अचोरयध्वम्
उत्तमपुरुषः	______	अचोरयावहि	______

विधिलिङ्-लकारः (विध्यर्थकः)

	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमपुरुषः	चोरयेत्	चोरयेयाताम्	चोरयेरन्
मध्यमपुरुषः	चोरयेथाः	चोरयेयाथाम्	चोरयेध्वम्
उत्तमपुरुषः	चोरयेय	चोरयेवहि	चोरयेमहि

रिक्तस्थानं पूरयन्तु (रिक्त स्थानों की पूर्ति कीजिए)

प्रथमपुरुषः	चोरयेत	______	चोरयेरन्
मध्यमपुरुषः	______	चोरयेयाथाम्	______
उत्तमपुरुषः	चोरयेय	______	चोरयेमहि

वेद पाठशालाएँ तथा गुरु-शिष्य परम्परा इकाइयाँ



MAHARSHI SANDIPANI RASHTRIYA VEDAVIDYA PRATISHTHAN

(Under the Ministry of Human Resource Development, Govt. of India)

Vadvidya Marg, Chintaman Ganesh, Post. Jawasia, Ujjain 456006 (M.P.)

Phone : (0734) 2502266,2502254, Fax : (0734) 2502253

E-mail : msrvvpujn@gmail.com, web - www.msrvvp.nic.in